## || श्री गुरुभ्यो नमः ||

# ॥ शङ्कर-जप-यज्ञम् ॥

## || गुरुवन्दनम् ||

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥१॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥२॥

श्रीसच्चिदानन्द शिवाभिनव्यनृसिंहभारत्यभिधान् यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन् सदात्मनिष्ठान् भजे मानवशम्भुरूपान्॥३॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥४॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥५॥

अज्ञानां जाह्नवीतीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥६॥

विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥७॥

## ॥ श्रीशङ्करभगवत्पादाचार्य अष्टोत्तरशतनामावळिः॥

श्रीशङ्कराचार्यवर्याय नमः

ब्रह्मानन्दप्रदायकाय नमः

अज्ञानतिमिरादित्याय नमः
सुज्ञानाम्बुधिचन्द्रमसे नमः
वर्णाश्रमप्रतिष्ठात्रे नमः५
श्रीमते नमः
मुक्तिप्रदायकाय नमः
शिष्योपदेशनिरताय नमः
भक्ताभीष्टप्रदायकाय नमः
सूक्ष्मतत्त्वरहस्यज्ञाय नमः१०
कार्याकार्यप्रबोधकाय नमः
ज्ञानमुद्राञ्चितकराय नमः
शिष्यहृत्तापहारकाय नमः
परिव्राजाश्रमोद्धर्त्रे नमः
सर्वतन्त्रस्वतन्त्रधिये नमः१५
अद्वैतस्थापनाचार्याय नमः
साक्षाच्छङ्कररूपधृते नमः
षण्मतस्थापनाचार्याय नमः
त्रयीमार्गप्रकाशकाय नमः
वेदवेदान्ततत्त्वज्ञाय नमः२०
दुर्वादिमतखण्डनाय नमः
वैराग्यनिरताय नमः
शान्ताय नमः
संसारार्णवतारकाय नमः
प्रसन्नवदनाम्भोजाय नमः२५
परमार्थप्रकाशकाय नमः
पुराणस्मृतिसारज्ञाय नमः
नित्यतृप्ताय नमः
महते नमः
शुचये नमः३०
नित्यानन्दाय नमः
निरातङ्काय नमः
निस्सङ्गाय नमः
निर्मलात्मकाय नमः
निर्ममाय नमः३५

निरहङ्काराय नमः
विश्ववन्द्यपदाम्बुजाय नमः
सत्त्वप्रधानाय नमः
सद्भावाय नमः
सङ्ख्यातीतगुणोज्ज्वलाय नमः४०
अनघाय नमः
सारहृदयाय नमः
सुधिये नमः
सारस्वतप्रदाय नमः
सत्यात्मने नमः४५
पुण्यशीलाय नमः
साङ्ख्ययोगविचक्षणाय नमः
तपोराशये नमः
महातेजसे नमः
गुणत्रयविभागविदे नमः५०
कलिघ्नाय नमः
कालकर्मज्ञाय नमः
तमोगुणनिवारकाय नमः
भगवते नमः
भारतीजेत्रे नमः५५
शारदाह्वानपण्डिताय नमः
धर्माधर्मविभागज्ञाय नमः
लक्ष्यभेदप्रदर्शकाय नमः
नादबिन्दुकलाभिज्ञाय नमः
योगिहृत्पद्मभास्कराय नमः६०
अतीन्द्रियज्ञाननिधये नमः
नित्यानित्यविवेकवते नमः
चिदानन्दाय नमः
चिन्मयात्मने नमः
परकायप्रवेशकृते नमः६५
अमानुषचरित्राढ्याय नमः
क्षेमदायिने नमः
क्षमाकराय नमः

भव्याय नमः
भद्रप्रदाय नमः७०
भूरिमहिम्ने नमः
विश्वरञ्जकाय नमः
स्वप्रकाशाय नमः
सदाधाराय नमः
विश्वबन्धवे नमः७५
शुभोदयाय नमः
विशालकीर्तये नमः
वागीशाय नमः
सर्वलोकहितोत्सुकाय नमः
कैलासयात्रा-सम्प्राप्तचन्द्रमौलि-प्रपूजकाय नमः
काञ्च्यां श्रीचक्रराजाख्ययन्त्रस्थापन-दीक्षिताय नमः
श्रीचक्रात्मक-ताटङ्कतोषिताम्बा-मनोरथाय नमः
श्रीब्रह्मसूत्रोपनिषद्भाष्यादिग्रन्थकल्पकाय नमः
चतुर्दिक्चतुराम्नाय प्रतिष्ठात्रे नमः
महामतये नमः८५
द्विसप्ततिमतोच्छेत्रे नमः
सर्वदिग्विजयप्रभवे नमः
काषायवसनोपेताय नमः
भस्मोद्धूलितविग्रहाय नमः
ज्ञानात्मकैकदण्डाढ्याय नमः९०
कमण्डलुलसत्कराय नमः
गुरुभूमण्डलाचार्याय नमः
भगवत्पादसंज्ञकाय नमः
व्याससन्दर्शनप्रीताय नमः
ऋष्यश्रृङ्गपुरेश्वराय नमः९५
सौन्दर्यलहरीमुख्य-बहुस्तोत्र- विधायकाय नमः
चतुष्षष्टिकलाभिज्ञाय नमः
ब्रह्मराक्षसमोक्षदाय नमः
श्रीमन्मण्डनमिश्राख्य-स्वयम्भूजयसन्नुताय नमः
तोटकाचार्यसम्पूज्याय नमः१००
पद्मपादार्चिताङ्घ्रिकाय नमः

हस्तामलक-योगीन्द्रब्रह्मज्ञान-प्रदायकाय नमः

सुरेश्वराख्य-सच्छिष्यसन्न्यासाश्रमदायकाय नमः

नृसिंहभक्ताय नमः

सद्रत्नगर्भहेरम्बपूजकाय नमः

व्याख्यासिंहासनाधीशाय नमः

जगत्पूज्याय नमः

जगद्गुरवे नमः१०८

श्रीमच्छङ्करभगवत्पादाचार्यस्वामिने नमः

**नमः शङ्कराय (१०००)**

## || श्री गुरुचरणारविन्दाभ्याम्  नमः||